# २९. पूजा

पञ्चमी

श्रद्धा - लते ! लते ! किम् करोति भवती ?

लता - आगच्छतु, आगच्छतु, कः विशेषः ? नूतनवस्त्रं धृतवती भवती ।

श्रद्धा - मम गृहे श्वः पूजा अस्ति । भवती आगच्छतु । भोजनार्थम् आगच्छतु ।

लता - अहमपि कार्ये साहाय्यं करोमि वस्तूनि कुतः आनयति ?

श्रद्धा - मधुराणि आपणतः आनयामि । पुष्पाणि फलानि च मम आर्यपुत्रः विपणितः आनयति । बान्धवाः कदली-पत्राणि ग्रामतः प्रेषयन्ति । पूजावस्तूनि अर्चकः गृहतः एव आनयति ।

लता - तिष्ठतु नलिकातः जलं स्रवति । आगच्छामि ?

श्रद्धा - भवत्याः गृहे जवनिकाः नूतनाः वा ? कुतः आनीतवती भोः ?

लता - मम पतिः प्रयागं गतवान् आसीत् । ततः जवनिकाः आनीतवान् । भवतु अहं किं कार्यं करोमि ? गृहतः शीघ्रम् आगच्छामि ।

श्रद्धा - भवती शीघ्रम् आगच्छतु । तत्र किं कार्यम् इति पश्यामः । भवतु आगच्छामि ।

लता - इतः कुत्र गच्छति ?

श्रद्धा - इतः मम गृहमेव गच्छामि । मम पतिः इदानीं कार्यालयतः आगच्छति । पुत्रः विद्यालयतः आगच्छति । विलम्बः अभवत्, गच्छामि ।